✧˖°*❋ ❋*°˖✧

# શનિ સ્તોત્રં દશરથ કૃતમ્

## **Shani Stotram : Dasaratha Krutam**

in gujarati

✧˖°*❋ ❋*°˖✧

# ॥ શનિ સ્તોત્રં દશરથ કૃતમ્ ॥

નમઃ કૃષ્ણાય નીલાય શિખિખંડનિભાય ચ ।
નમો નીલમધૂકાય નીલોત્પલનિભાય ચ ॥ 1 ॥

નમો નિર્માંસદેહાય દીર્ઘશ્રુતિજટાય ચ ।
નમો વિશાલનેત્રાય શુષ્કોદર ભયાનક ॥ 2 ॥

નમઃ પૌરુષગાત્રાય સ્થૂલરોમાય તે નમઃ ।
નમો નિત્યં ક્ષુધાર્તાય નિત્યતૃપ્તાય તે નમઃ ॥ 3 ॥

નમો ઘોરાય રૌદ્રાય ભીષણાય કરાળિને ।
નમો દીર્ઘાય શુષ્કાય કાલદંષ્ટ્ર નમોઽસ્તુ તે ॥ 4 ॥

નમસ્તે ઘોરરૂપાય દુર્નિરીક્ષ્યાય તે નમઃ ।
નમસ્તે સર્વભક્ષાય વલીમુખ નમોઽસ્તુ તે ॥ 5 ॥

સૂર્યપુત્ર નમસ્તેઽસ્તુ ભાસ્વરોભયદાયિને ।
અધોદૃષ્ટે નમસ્તેઽસ્તુ સંવર્તક નમોઽસ્તુ તે ॥ 6 ॥

નમો મંદગતે તુભ્યં નિષ્પ્રભાય નમોનમઃ ।
તપસા જ્ઞાનદેહાય નિત્યયોગરતાય ચ ॥ 7 ॥

જ્ઞાનચક્ષુર્નમસ્તેઽસ્તુ કાશ્યપાત્મજસૂનવે ।
તુષ્ટો દદાસિ રાજ્યં ત્વં ક્રુધ્દો હરસિ તત્ક્ષણાત્ ॥ 8 ॥

દેવાસુરમનુષ્યાશ્ચ સિધ્દવિદ્યાધરોરગાઃ ।
ત્વયાવલોકિતાસ્સૌરે દૈન્યમાશુવ્રજંતિતે ॥ 9 ॥

બ્રહ્મા શક્રોયમશ્ચૈવ મુનયઃ સપ્તતારકાઃ ।
રાજ્યભ્રષ્ટાઃ પતંતીહ તવ દૃષ્ટ્યાઽવલોકિતઃ ॥ 10 ॥

ત્વયાઽવલોકિતાસ્તેઽપિ નાશં યાંતિ સમૂલતઃ ।
પ્રસાદં કુરુ મે સૌરે પ્રણત્વાહિત્વમર્થિતઃ ॥ 11 ॥

✧˖°*❋ ❋*°˖✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net